National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 208-212
© 2026 NJHSR
www.sanskritarticle.com

**पुलक-दासः**
अनुसन्धाता, सांख्ययोगविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र- ५१७५०७,

**Correspondence:**
**पुलक-दासः**
अनुसन्धाता, सांख्ययोगविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र- ५१७५०७,

# सिद्धसिद्धान्तपद्धतौ सद्गुरुतत्त्वं तथा अवधूतयोगिलक्षणम्

**पुलक-दासः**

**सारांशः—**

नाथपरम्परायां प्रतिष्ठिते गुरुगोरक्षनाथकृत-सिद्धसिद्धान्तपद्धतिः नामके ग्रन्थे प्रतिपादितस्य सद्गुरुतत्त्वस्य तथा अवधूतयोगिनः स्वरूपविशेषस्य तात्त्विकदृष्ट्या सूक्ष्मपरिशीलनात्मकं विवेचनं क्रियते। नाथयोगपरम्परायां गुरुतत्त्वं परमावश्यकतत्त्वतया स्वीकृतम्, यतः केवलं गुरुकृपाप्रसादेनैव साधकः अविद्याबन्धनं भित्त्वा परमपदस्य साक्षात्कारं कर्तुं समर्थो भवति; अतः अस्मिन् प्रबन्धे 'गुरु' शब्दस्य व्युत्पत्तिपरिशीलनपूर्वकं सद्गुरोः लक्षणानि—यथा तत्त्वदर्शित्वम्, अनुग्रहशक्तिः, शिष्यचित्तशोधनसमर्थता, आत्मानुभवरूपप्रमाणत्वं च—विशदीकृतानि। अनन्तरं अवधूतयोगिनः स्वरूपं निरूप्यते, यस्य व्यक्तित्वं लौकिकधर्माधर्मविवेकातीतं, द्वन्द्वातीतं, सर्वसङ्गपरित्यागपूर्वकं अद्वैततत्त्वे स्थितं च भवति; स हि न केवलं संन्यासधर्मपालकः, अपितु ब्रह्मात्मैक्यसाक्षात्कारलक्षणां परमार्थावस्थां प्राप्तः योगीति सिद्धसिद्धान्तपद्धत्यां प्रतिपाद्यते। तस्य आचारः, व्यवहारः, अन्तर्बाह्यवृत्तीनां निरपेक्षता, सर्वात्मभावनिष्ठता च दार्शनिकदृष्ट्या सूक्ष्मतया विश्लेष्यन्ते, यत्र अवधूतावस्था परमार्थतः आत्मतत्त्वस्यैव परिपूर्णाविर्भावरूपा निर्दिश्यते। अस्य शोधस्य प्रमुखोऽभिप्रायः अस्ति यत्—नाथसम्प्रदायीययोगमार्गे सद्गुरोः अनिवार्यता, तस्य अनुग्रहस्य मोक्षोपयोगिता, तथा अवधूतावस्थायाः परमोत्कृष्टपरिणतिः इत्येतयोः प्रतिपादनम्। अन्ततः अयं निष्कर्षः सुस्पष्टतया स्थापितो भवति यत् सद्गुरुः एव साधकस्य जीवनमार्गस्य परमप्रदीपः, तस्यैव अनुग्रहात् अवधूतभावप्राप्तिः, तदनन्तरं परमपदस्य अनुभूतिः च साध्यते इति।

**कूटशब्दाः—** नाथयोगपरम्परा, सद्गुरुतत्त्वम्, तत्त्वदर्शित्वम्, अवधूतभावप्राप्तिः, परमपदम्।

**भूमिका—**

भारतीयसंस्कृतिपरम्परायां मातृपितृभ्यां सह गुरुतत्त्वस्य परमोत्कर्षो विशेषतया प्रतिपादितः दृश्यते, यतो हि यद्यपि माता नवमासपर्यन्तं गर्भधारणरूपेण, ततः परं लालनपालनादिक्लेशसहनेन च अपारं श्रमं वहति, तथा च पिता अपि जीवनोपयोगिसाधनसंपादनरूपेण स्वजीवनमेव संततये समर्पयति, तथापि तयोः कृतोपकारपरिमाणात् अपि गुरोः उपकारः श्रेयस्करतर इति शास्त्रेषु निःसन्दिग्धं प्रतिपादितम्। महाभारते अपि— **"गुरुर्गरीयान् मातृतः पितृश्चेति मे मतिः"**[1] इति वचनेन गुरोः सर्वोपरि स्थानं निरूपितम्। यतः गुरुरेव अज्ञानान्धकारनिवर्तकः, स एव शिष्यस्य चक्षुषीव उद्घाट्य तस्मै ज्ञानदीपिकां दत्त्वा संसारमार्गे स्थितान् विघ्नान् परिहर्तुं समर्थयति; न केवलं लौकिकविद्यायाः अपि तु पारमार्थिकतत्त्वज्ञानस्य, योगमार्गस्य, मोक्षसाधनस्य च बोधने गुरोः अनिवार्यता अवगम्यते। अत एव भारतीयपरम्परायां गुरुकुलव्यवस्था, गुरुपरम्परा च आदिकालादारभ्य प्रतिष्ठिता, यत्र गुरुः केवलं शिक्षकः न, अपितु आध्यात्मिकब्रह्मस्वरूपः, जीवनमार्गदर्शकः, चैतन्यप्रदीपप्रज्वालकश्च इति मन्यते। एवं दृष्ट्या, यद्यपि मातापितरौ शरीरजननपालनयोः कारणभूतौ, तथापि गुरुः आत्मज्ञानप्रदानेन जीवस्य पुनर्जन्मबन्धविमोचनमार्गं प्रदर्शयति; अतः स एव **"तमसो मा ज्योतिर्गमय"**[2] इति श्रुतिवाक्यार्थस्य प्रत्यक्षकारकः, मोक्षमार्गस्य परमोपदेश्टा च इति सिद्धम्।

भारतीयदर्शनपरम्परायां मानवजीवनस्य परमपुरुषार्थभूता मुक्तिः प्रधानलक्ष्यत्वेन स्वीकृत्य तदुपलब्धये विविधोपायानां निरूपणं क्रियते, तेषु च योगमार्गः चित्तवृत्तिनिरोधपूर्वकात्मसाक्षात्कारप्राप्तेः साधनरूपेण विशेषतया प्रतिष्ठितः; अस्यैव योगपरम्परायाः अन्तर्गतं नाथसम्प्रदायः शिवपरम्पराप्रसूतः आदिनाथ–मत्स्येन्द्रनाथ–गोरक्ष-नाथादिगुरुपरम्परया प्रवहन् प्रत्यक्षानुभवप्रधानसाधनामार्गत्वेन विशिष्टस्थानं धारयति, यत्र हठयोगः, कुण्डलिनीयोगः, पिण्डब्रह्माण्ड-साम्यदृष्टिश्च प्रमुखतत्त्वत्वेन स्वीकृताः सन्ति, एतेषां च सुसङ्गतं दार्शनिकं निरूपणं गोरक्षनाथप्रणीतायां सिद्धसिद्धान्तपद्धतौ दृश्यते; अस्यामेव परम्परायां गुरुतत्त्वं परमप्रधानतया प्रतिपाद्यते, यस्य कृपया एव साधकः अज्ञानतमसः परिमोक्षणं कृत्वा आत्मतत्त्वस्य साक्षात्काराय समर्थो भवति।

**नाथसम्प्रदाये गुरुतत्त्वविवेचनम्—**

नाथसम्प्रदायस्य आध्यात्मिकपरम्परायां गुरुतत्त्वस्य स्थानं परमप्रधानत्वेन प्रतिष्ठितम्, यतो हि योगमार्गः स्वभावतः गूढतमः, दुर्विज्ञेयः, अन्तर्मुखानुभवप्रधानश्च भवति, तस्य रहस्यप्रकाशनं केवलं सिद्धगुरुणैव साध्यते, न तु शास्त्राध्ययनमात्रेण; अत एव स्वगुरवे प्रणिपत्य गोरक्षनाथेनोक्तं—

**श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहम्।**
**यस्य सान्निध्यमात्रेण चिदानन्दायते तनुः॥**[3] इति।

अनेन गुरोः साक्षाच्चिदानन्दस्वरूपता प्रतिपाद्यते। तस्यैव सान्निध्यतः कृपाकटाक्षमात्रेण शिष्यस्य स्थूलपिण्डोऽपि चिदानन्दमयः चिन्मयः सच्चिद्रसैकघनश्च भवति। यदा साक्षात्सिद्धगुरुणा परमपदप्राप्तेः उपायभूतस्य योगमार्गस्य उपदेशेन परमात्मबोधः प्रदीयते, तदा तत्क्षणमेव स्वसंवेद्यः अलखनिरञ्जनः परशिवः इत्यस्य प्रत्यक्षसाक्षात्कारः जायते। अतः गुरोः कृपा एव योगसिद्धेः एकमात्रं कारणं भवति। अत्र न केवलं ज्ञानप्राप्तिः, अपि तु अस्तित्वस्यैव रूपान्तरं लक्ष्यते, जडदेहस्य चिदात्मतया परिणतिः, इयं नाथयोगस्य परमगूढा प्रक्रिया भवति।

**यस्मिन् दर्शिते सति तत्क्षणात् स्वसंवेद्यसाक्षात्कारः।**
**समुत्पद्यते ततो गुरुरेवात्रकारणमुच्यते॥**[4] इति।

अनेन स्पष्टतया प्रतिपाद्यते यत् सद्गुरुदर्शनेन एव तत्त्वज्ञानस्य न केवलं बौद्धिकावगमः, अपि तु स्वानुभवरूपः अखण्डात्मसाक्षात्कारः सहसा प्रादुर्भवति, यस्तु न केवलं योगमार्गोपदेशस्य फलम्, किन्तु गुरुकृपाशक्तेः अविर्भावविशेषः; अस्यां परम्परायां शिक्षात्रयं निरूप्यते—औपदेशिकी, करुणावलोकनरूपा, शक्तिपातात्मकाच—तत्रादौ द्वयं सामान्यविदुषामपि साध्यम्, किन्तु शक्तिपातरूपा तृतीया दीक्षा केवलं सिद्धगुरोः ईश्वरस्य वा विशेषाधिकारभूता, यस्यां क्षणे शिष्यचेतसि सुप्ताविद्याग्रन्थयः भिद्यन्ते, प्राणशक्तिः प्रबुध्यते, चैतन्यस्य अखण्डविस्तारानुभवः जायते, अतो हि परमार्थतत्त्वसाक्षात्कारस्य, योगसिद्धेः, मोक्षमार्गप्रवृत्तेश्च एकमेव परमकारणं सद्गुरुरेव इति निःसन्देहं निष्पद्यते। यतो हि केवलं गुरोः करुणाकटाक्षमात्रेणापि अविद्यावृतचित्तस्य साधकस्य परमपदप्राप्तिः सुलभतया सम्भवति; एतदेव सिद्धसिद्धान्तपद्धत्यां स्वयं शिववाक्यं प्रतिपादितम्—

**न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम्।**
**शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः॥**[5] इति।

यस्माद्गुरुरेव परब्रह्मस्वरूपः, तस्योपदेशेनैव पिण्डपरपिण्डयोः अभेदभावनायाः उदयः सिध्यति। महासिद्धयोगिनः स्वदेहपरिमितं पिण्डं न केवलं स्थूलशरीरत्वेन पश्यन्ति, किन्तु तमेव परपिण्डेन सह शुद्धचैतन्यैक्यरूपेण समरसयन्ति, यत्र पिण्डस्य ब्रह्माण्डेन सह तादात्म्यबोधः अनुभूयते; अयं च पिण्डसंवित्तिः इति कथ्यते। अतः साधकेन गुरोः श्रीचरणयोः शरणागत्य, सेवाभक्तिपूर्वकं तस्य प्रसादं लब्ध्वा, तेनोपदिष्टयोगमार्गान्—मन्त्र, ध्यान, नाडीचिन्तन, कुण्डलिनीप्रबोधनादीन्—अत्यन्तसावधानतया आचरितुं युक्तम्; ततो हि स्वपिण्डादारभ्य परपिण्डपर्यन्तं सर्वं चैतन्यमात्रमेव, नान्यत्किञ्चिदस्ति इति दृढभावना विकसितुं शक्यते। एषा भावना यदा परिपक्वा भवति, तदा साधकः स्वात्मनः ब्रह्मणि अभेदत्वं प्रत्यक्षानुभवेन साक्षात्करोति, यतः पिण्डब्रह्माण्डयोः भेदबुद्धिः निवर्तते, अद्वयपरमपदस्य च प्राप्तिः भवति।[6] अत एव नाथयोगशास्त्रे गुरोः अनुग्रहः एव मोक्षस्य प्रधानोपायः इति निष्कर्षः निर्विवादतया स्वीकर्तव्यः।

नाथसम्प्रदायपरम्परायां गुरुतत्त्वस्य परमोपाधेयत्वं न केवलं साधनमार्गस्य अपेक्षया, अपि तु मोक्षद्वारप्रवर्तनस्य प्रमुखकारणत्वेन व्यवस्थितमिति दार्शनिकदृष्ट्या निःसन्दिग्धं प्रतिपाद्यते; यतो हि अमनस्कयोगे स्पष्टतया निगद्यते—

**गुरुर्ब्रह्म गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।**
**गुरूदेवात्परं नास्ति तस्मात्तं पूजयेत्सदा॥**[7] इति।

यतो हि गुरुः एव सर्वज्ञानप्रदीपः, अज्ञानान्धकारनाशकः, मोक्षमार्गप्रदर्शकश्च इति निःश्रेयसहेतुत्वेन स्थापितः; गुरुरेव हि शिष्यस्य चित्तगुहायां निविष्टानामविद्यावासनानां निवारणपूर्वकं आत्मतत्त्वस्य प्रकाशनं करोति, येन स संसारदुःखसमुद्रात् उद्धृत्य परमानन्दस्वरूपे ब्रह्मणि प्रतिष्ठाप्यते।[7] विशेषतः नाथयोगपरम्परायां, यत्र योगमार्गः अत्यन्तगूढः, अनुभवपरकः, रहस्यात्मकश्च, तत्र गुरोः अनुग्रहम् अनपेक्ष्य न कस्यचित् साधकस्य सिद्धिः सम्भवति, यतो हि गोरक्षनाथेनापि स्पष्टतया निर्दिष्टं यत्—योगसाधनाया अन्तरङ्गतत्त्वानि, नाडिचक्रकुण्डलिनीप्रबोधनादयः, केवलं गुरूपदेशेनैव ज्ञातुं शक्यन्ते, न तु स्वाध्यायमात्रेण; अतः नाथसिद्धपरम्परायां गुरुः न केवलं उपदेष्टा, अपि तु जीवन्मुक्तिप्रदायकः, योगमार्गस्य एकमेव द्वारभूतः, तत्त्वबोधस्य मूलाधारः च इति निर्णीयते।

अतः गुरो उपरि कोऽपि नास्ति, गुरुः पूजनीयः भवति। गुरुपदेशः श्रवणमात्रेण शिष्यः तत्त्वमयः सम्पद्यते, यथा पारदस्पर्शन ताम्र सुवर्णमिव परिणमति।[8] यः गुरुशिष्यस्य अज्ञानान्धकारं विदारित्य तं चैतन्यस्वरूपे प्रतिष्ठापयति, स एव आत्मशुद्धेः माध्यमं भवति। गुरुप्रसादेन च परमपदप्राप्तिः मोक्षलाभः च सिद्ध्यति। कोटिशः शास्त्रपाठस्यापि लाभः विफलो भवति यदि गुरुकृपा न भवेत्।[9] गुरोः उपदेशात् शिष्यः चैतन्यमयस्वरूपे विश्रान्तिं लभते, यस्मात् सः परमानन्दरूपे परशिवे आत्मसाक्षात्कारं कर्तुं शक्नोति। अखण्डं, अनन्तं, अलक्ष्यं च निरञ्जनं स्वरूपं अनुभवन्तीति।[10]

**अवधूत एव सद्गुरुः—**

अत्र शैवयोगपरम्परायां सद्गुरुतत्त्वस्य विवेचने निर्णीयते यत् न केवलं शास्त्राध्ययननिपुणता, न च वाग्वैदग्ध्यमात्रं, अपि तु स्वानुभूतब्रह्मतत्त्वसाक्षात्कार एव सद्गुरुत्वस्य परमप्रमाणं भवति; यतो हि केवलं शास्त्रपाठपरायणः पुरुषः प्रायः दम्भगर्वाभिभूतचित्तत्वेन स्वात्मतत्त्वं न प्रकाशयितुं समर्थो भवति, किन्तु जितेन्द्रियः, निर्वासनः, स्वानुभवपरिपक्वबुद्धिः योगी एव परमार्थतत्त्वस्य प्रत्यक्षदर्शी सन् शिष्याणां चित्ते तद्बोधं संप्रवर्तयितुं क्षमते।

**जितेन्द्रयश्च भगवान् स सुधीः कोविदो बुधः।**
**चार्वाकश्चार्हतश्चेति तथा बौद्धप्रकाशवित्॥[11]** इति।

अस्यैव सिद्धान्तस्य परिपुष्ट्यर्थं शैवमतानुसारं अवधूतयोगिनः एव सद्गुरुत्वेऽधिकारः स्वीक्रियते, यतः अवधूतः साक्षादेव निरुपाधिकशिवस्वरूपप्रतिपत्त्या स्थितः सन् न केवलं तत्त्वज्ञः, किन्तु तत्त्वस्वरूप एव भवति।

अवधूतगीतायाम् अवधूतलक्षणानि वर्णयन्ती "अवधूत" शब्दस्य अक्षरविभागेन तत्त्वमिमं निरूपयति—अकारेण निराशत्वं, निर्मलादिमध्यान्तस्वभावत्वं, ब्रह्मानन्दैकनिष्ठत्वं च;[12] वकारेण सर्ववासनाक्षयः, दोषरहितवचनप्रवृत्तिः, यथाकालानुकूलव्यवहार-कुशलता च;[13] "धू"कारेण धूलिधूसरितदेहत्वेन देहाभिमानशून्यता, चित्तनिर्मलता, ध्यानधारणातीतावस्था च;[14] पुनर्वकारेण चिन्ताचेष्टाशून्यता, अहंकारनिवृत्तिः, तत्त्वप्राप्त्यभिमानत्यागश्च प्रकाश्यते।[15] एतेषां सर्वेषां लक्षणानां समन्वयेन यः योगी सर्वसंस्कारवासनाबन्धनातीतः, स्वात्मन्येव विश्रान्तचित्तः, अनन्य-शिवभावनिष्ठश्च भवति, स एव अवधूत इति परिभाष्यते। तादृश एव पुरुषः सद्गुरुः इति कथ्यते, यतः तस्य केवलं एकः कृपाकटाक्षोऽपि शिष्यस्य अन्तःकरणे अविद्याग्रन्थेः भेदनं कृत्वा भवबन्धननिवृत्तिं साधयितुं समर्थः भवति—"गुरुकृपाकटाक्षमात्रेण बन्धमोक्षौ" इति नाथसम्प्रदायस्य प्रसिद्धोऽयं सिद्धान्तः।

सिद्धसिद्धान्तपद्धत्यां स्पष्टतया निर्दिष्टं यत्— यः स्वयमेव आत्मज्ञानविहीनः, मिथ्याचाररतः, शास्त्रज्ञानपराङ्मुखः, स धारयति, अनाहतनादरूपं मृगचर्मं धारयति, परशक्ति-ज्ञानरूपं शेलीं धारयति।

गुरुरित्यभिमानं वहन्नपि परित्याज्य एव, यतो हि आत्मनिष्ठाशान्तिस्वरूपं यः स्वयमेव न वेत्ति, स कथं अन्येषां कल्याणहेतुर्भवितुमर्हति; तस्मात् मिथ्यावादी गुरुः अवधूतशब्दयोग्यो न भवति।[16] पुनश्च सिद्धसिद्धान्तपद्धत्यां अवधूतगुरोः स्वरूपं विशदीकृतम्—

**वाङ्मात्राद्वाथ दृक्पाताद् यः करोति च तत्क्षणात्।**
**प्रस्फुटं शाम्भवं वेद्यं स्वसंवेद्यं पर पदम्॥**
**करुणाखड्गपातेन छित्वा पाशाष्टकं शिशोः।**
**सम्यगानन्दजनकः सगुरुः सोऽभिधीयते॥[17]** इति।

यः स्वानुभूतिसिद्धं परमपदं, मोक्षस्वरूपं, केवलं मधुरोपदेशेन वा करुणाकटाक्षमात्रेण वा शिष्ये प्रकटयति, तथा च तस्य कृपाशक्त्या शिष्यस्य जरामरणादिदुःखहेतवः काम-क्रोध-लोभ-मोह-अहंकार-अविद्याद्यष्टबन्धनसमूहाः क्षणेन विनश्यन्ति, आत्मज्ञानप्रकाशेन च तं परमआनन्दरूपे प्रतिष्ठापयति, स एव नाथपरम्परायां परमार्थतः सद्गुरुः, अवधूतः, शिवस्वरूपश्च इति निष्कर्षः।

नाथसम्प्रदाये अवधूत एव सद्गुरुः भवति। गुरुं समासाद्यं तदुपदर्शितसमरसकरणानुष्ठानेन सिद्धिप्राप्त्यनन्तरमवधूतयोगी भवति। एतादृशः नित्यावधूतः सिद्धयोगी सर्वबन्धनातत् परः, यस्य उपदेशमात्रेण शिष्यः अवधूतत्वं प्राप्नोति। गुरुगोरक्षनाथेन तस्य परिचयाय लक्षणं कथ्यत इति प्रकरणसङ्गतिः प्रारम्भे प्रदर्शिता भवति। तथा अवधूतलक्षणविषये उक्तमस्ति— यः **'सर्वान् प्रकृतिविकारान् अवधुनोति'[18]**। अर्थात् सर्वान् प्राकृतसकल-सम्बन्धनान् त्यक्त्वा सामरसस्वरूपेण परब्रह्मे प्रतिष्ठितः सैव अवधूत इत्यर्थः। एवं योगी इत्युक्ते यस्मिन् पार्श्वे योगः अस्ति सैव योगी। अर्थात् संसारेभूत्वा सर्वसंसारविषयेभ्य यः निवृत्यः भवति सैव योगी उच्यते। योगीत्वं प्रसङ्गे गोरक्षनाथेन उक्तम— अवधूतस्य निःश्वासरूपेण वर्तमानो वायुः तस्य बीजं तु 'य' कारः भवति, पुनस्तस्यावधूतस्य शरीरेष्मरूपेण वर्तमानो वायुः अग्निः सस्य बीजं 'र'कारः भवति। उभयोः एकता (समरसता) चिद्रूपः ओंकारः (ॐ) उच्यते। एवं जीवात्मपरमात्मेक्यलक्षणैक्ययोगतत्त्वेन योगीति पदम् उच्यते।[19] एवंप्रकारेण उभयोः कर्मयोः संयुज्य अवधूतयोगी भवति।

अविद्यादि पञ्चक्लेशान् विमुक्त्य अनात्मप्रपञ्चं त्यक्त्वा आत्मस्वरूपे स्थितः योगी अवधूतोऽभिधीयते। यः सर्वान् कामान् दग्ध्वा तेन भस्मना स्वाङ्गे विभूषति, गुरुपदीष्टे साधनामार्गे स्थिरः भवति, विषयप्रपञ्चे स्थित्वा निर्विषयी भवति, रागद्वेषविनिर्मुक्तः लोकमध्ये स्थिते शरीरे केवलं कौपिनं, हस्ते पात्रञ्च (खप्परम्) गृहीत्वा भ्रमति, अखण्डसच्चिदानन्दरूपः शङ्खः एवं परमात्मज्ञानस्वरूपा पादुका येन

यस्य कटौ वैराग्यरूपा मेघला नित्यं वर्तते। षड्विकारेभ्यः निवृत्तिरूपकटासनं उपविशति, येन चित्प्रकाशपरानन्दरूपः

कुण्डलद्वयं कर्णे धारयति, यः धैर्यरूपः दण्डं धारयति, यः निजशक्तिरूपः योगपट्टं धारयति, स्वयं भेदाभेदौ द्वैताद्वैत भिक्षां कृत्वा भक्षयित्वा स्वस्य स्वरूपानन्दस्य आस्वादाने परिपूर्णं भवति। सः प्रसन्नतायाः प्रतीकस्वरूपा मुद्रां धारयतीति। यः स्वस्वरूपदर्शने लीनः भवति।

स्वस्वमध्ये सकलात्मसु सदा सततं यो योगी स्वयं स्वस्वरूपं सम्यगावर्तयति। अत एव समत्वेन स्वाभिन्नत्वेन जगत् संसारं अनुभवति सः 'अवधूतः' कथ्यते। अवधूतस्य प्रत्येकस्मिन् वाक्ये वेदः निवसति एवं प्रत्येकस्मिन् वाक्ये कैवल्यं परिलक्षते। सः त्यागभोगाभ्यां निवृतो भवति।

स अवधूतः अत्याश्रमी आश्रमानतीत्य वर्त्तमानः योगी योगाभ्यासतत्परः (ज्ञानी), आत्मज्ञः, अणिमादिसिद्धिसम्पन्नः, तपोनिष्ठः, ईश्वरो, हिरण्यगर्भादिदेवः। तथा स्वामी, नायकः, श्रीसाधुः, शक्तिसहितोपासकः, परोपकारनिरतः धन्यवादार्हः, अवधूते सर्वं स्वरूपता घटत इति भावः।

स एव जितेन्द्रियः वशीकृतेन्द्रिवर्गभगवान् ऐश्वर्यसंपन्नः स सुधीः, शोभनध्यानकर्तावुधः, लौकिकावगमनवान् पण्डितः। एवमेव विशिष्ट-लक्षणकारणात् स अवधूतः ब्रह्मचारी-गृहस्थ-वानप्रस्थ-संन्यासी-त्रिदण्डी-एकादण्डी-शैव-तापस-पाशुपत्-कालमुख-लिङ्गायत-कापा-लिक-शाक्त-शक्तिज्ञाता इत्यादिषु निखिलशब्दानामवधूतपदार्थे समन्वयः प्रस्तूयते।

चार्वाक-आहर्त- सांख्य- शैव- मीमांसक- वेदान्तादिपर्यन्तं सर्वेषां व्यावहारिकः मतभेदेऽपि परमार्थावधूतत्वे बोधयितुं स्वशिष्यान् मार्गदर्शनं कुर्वन्ति। यः निराकारपदे चिदानन्दघने स्थितः रममाणः अवधूततनुः सकललिङ्गरहितविग्रहः योगी साधनवान् स सर्वेषां दर्शनानां निखिलसिद्धान्तानां स्वस्वरूपं निजात्मस्वरूपं प्रकाशते।[20]

एवं प्रकारेण गुरुगोरक्षनाथः भागवत्व, भेदवादी पञ्चरात्रिकत्व, वैष्णवत्व, सात्विकत्व, सूक्ष्मसात्विकत्व, सत्यवादित्व, पुरुषोत्तमत्व, क्षणपणकत्वादि प्रमुखावधूतनां महासिद्धित्वस्य विविधानां लक्षणादिनां विषये आलोचितवान्।

ग्रन्थान्ते परमपदप्राप्तार्थानां विविधानां परम्पराणां तार्किका-पूर्णदोषान् वर्णयित्वा तेषामपि खण्डनं कृतवान्। साधकानां उपदिष्ठसिद्धान्तरूपं योगशास्त्रेऽयम् अत्यन्तं दिव्यम्, स्वतः निगूढरहस्यं परमात्मस्वरूपञ्च वर्तते। सर्वतत्त्वानां एकमात्रं निश्चितं सिद्धान्तमस्ति। तथा च तदनुरूपनिर्देशानां साधकस्य प्रचारः करणीयमिति शास्त्रमहत्त्वं प्रतिपादितम्।[21] अनन्तरं 'आदेशः' इति सद्वाण्याः व्यावहारः निर्देशति। योगिनाम् आदेशपदस्य साङ्केतिकोऽर्थ प्रसिद्धः। आदेश इति कथनेन योगी प्रसीदति। आदेशपदस्य आत्मा, जीवात्मा, परमात्मनाञ्च एकतां सुचयति। एषः शब्दः परमात्मकः निर्देशः इति मन्यते। तस्य उच्चारणमात्रेण जरा-मृत्यु-सुख-दुःख-राग-द्वेषादि सर्वे लौकिकदोषाः लयः भवन्तीति योगिनः मन्यन्ते।

**निकर्षः—**

अस्मिन् प्रबन्धे नाथसम्प्रदायानुसारं गुरुतत्त्वस्य परममहत्त्वं तथा अवधूतयोगिनः स्वरूपं सूक्ष्मतया प्रतिपादितम्। निष्कर्षतः स्पष्टं भवति यत्—सद्गुरुः एव योगमार्गस्य मूलाधारः, तस्य अनुग्रहात् एव आत्मसाक्षात्कारः, मोक्षप्राप्तिः च सम्भवति। अवधूतः तु तत्त्वसाक्षात्कारपरिपक्वः, द्वन्द्वातीतः, शिवस्वरूपनिष्ठः च भवति, स एव वास्तविकः सद्गुरुः इति नाथदर्शने स्वीकृतम्। अतः गुरुकृपया एव साधकः अविद्याबन्धनात् मुक्त्वा सामरस्यरूपं परमपदं प्राप्नोति इति सिद्धम्।

**सन्दर्भग्रन्थपञ्जी**


१. *उपनिषद् ग्रन्थावली* । सम्पादकः स्वामी गम्भीरानन्दः। कलकाता; उद्बोधन-कार्यालयः, १९४२ ।

२. *गोरक्षपद्धतिः एवं गोरक्षयोगशास्त्रम्* । सम्पादकः श्यामलेशकुमार-तिवारी । वाराणसी; चौखम्बा सुरभारती-प्रकाशनम्, २०१९ ।

३. *महाभारतम्*। सम्पादकः रामनारायणदत्त-शास्त्री पाण्डेयः। गोरक्षपुर; गीता-प्रेस्, २०१३ ।

४. *योगदर्शनम्* । सम्पादकः स्वामी भर्गानन्दः । कलकाता; उद्बोधन-कार्यालयः, २००४ ।

५. *शब्दकल्पद्रुमः*।सम्पादकः राजाराधीकान्तदेव-बाहादुरः। वाराणसी; चौखम्बा-संस्कृत-सीरीज्-आफिस्, १९६७ ।

६. *सिद्धसिद्धान्तपद्धतिः ('उमंग' हिन्दिटीकासहित)* । सम्पादकः परमहंसस्वामी अनन्त-भारती। दिल्ली; चौखम्बा-ओरियन्टालिया, २०१७ ।

७. *सिद्धसिद्धान्तपद्धतिः* । सम्पादकः द्वारिकादासशास्त्री । वाराणसी; चौखम्बा-विद्याभवनम्, २०१९ ।

८. *सिद्धसिद्धान्तपद्धतिः*। सम्पादकः राघवेन्द्रजीदूबे। वाराणसी; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, २००८ ।

९. *सिद्धसिद्धान्तपद्धतिः*। सम्पादकः रामलाल-श्रीवास्तवः। गोरक्ष-पुरम्; गोरक्षनाथ-मन्दिरम्, १९८१।

१०. *श्रीदत्तात्रेयविरचिता अवधूतगीता*। सम्पादकः परमान्दजीकृत भाषाटीकासहिता। मुंबई; लक्ष्मीवेंकटेश्वरः छापाखाना, संवत् १९७९।

**पाद टिप्पणी:**

[1] महाभारत, शान्तिपर्व १०८.१७

[2] बृह. १,३.२८

[3] गो.श- १।१

[4] सि.सि.प- ५।६

[5] सि.सि.प- ५.६६

[6] अतएव महासिद्धयोगिभिः सम्यग् गुरुप्रसादं लब्धावधानबलेनैक्यं भजमानैस्तत्क्षणात् परमं परमेवानुभूयते। सि.सि.प- ५।९

[7] अ.यो- २।४४

[8] ततः स मुच्यते शिष्यो जन्म संसारबन्धनात्। परमानन्दमयो भूत्वा निष्कलः शिवतां व्रजेत्॥ सि.सि.प- ५।७८

[9] यथा सिद्धरसस्पर्शात् ताम्रं भवति काञ्चनम्। गुरूपदेशश्रव-णाच्छिष्यस्तत्त्वमयस्तथा॥ अ.यो- २।४८

[10] किमत्र बहुनोक्तेन शास्त्रकोटिशतेन च। दुर्लभा चित्तविश्रान्तिर्विना गुरु कृपां पराम्॥ सि.सि.प- ५।८१

[11] गुरुरिति गृणाति शं सम्यक् चैतन्यविश्रान्तिमुपदिशति विश्रान्त्या स्वयमेव परात्परं परपदमेव प्रस्फुटं भवति, तत्क्षणात् साक्षात्कारो भवति॥ ५।७१

[12] सि.सि.प- ६।२२

[13] आशापाश विनिर्मुक्ता मध्यान्त निर्मलम्। अनन्तान्द ब्रह्मणः अकारं तस्य लक्षणम्॥ अव.गी- ८।६

[14] वासना वर्जिता येन वक्तव्यं च निरामयम्। वर्तमानेषु वर्तेत वकारं तस्य लक्षणम्॥ अव.गी- ८।७

[15] धूलि धूसर गात्राणि धूत चित्त निरामयम्। ध्यान धारणा निर्मुक्तं धूकारं तस्य लक्षणम्॥ अव.गी- ८।८

[16] तत्त्व चिन्ता येन धूता चिन्ता चेष्टा विवर्जिता। तमहंकार निर्मुक्तम तकारं तस्य लक्षणम्॥ अव.गी- ८।९

[17] ज्ञानहीनो गुरुस्त्याज्यः मिथ्यावादी विडम्बकः। स्वविश्रान्तिं न जनाति परेषां स करोति किम्॥ सि.सि.प- ५।७३

[18] सि.सि.प- ५।६७,६८

[19] सि.सि.प- ६।१

[20] यकारो वायुबीजं स्यद्रकारोवह्निबीजकम्। तयोरभेद ओङ्कारश्चि-दाकारः प्रकीर्तितः॥ -सि.सि.प- ६।२

[21] अवधूततनुर्योगी निराकारपदे स्थितः। सर्वेषां दर्शनानाञ्च स्वस्वरूपं प्रकाशते॥ सि.सि.प- ६।३३

[22] एतच्छास्त्रं महादिव्यं रहस्यं पारमेश्वरम्। सिद्धान्तं सर्वसारस्य नानासंकेतनिर्णयम्॥ सि.सि.प- ६।